International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 275-278
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 15-04-2026
Publish : 17-04-2026

**Mallika Sen**
Phd Scholar,
Lucknow Campus Under Central-Sanskrit University,Gomti Nagar, Lucknow, Uttar Pradesh 226010

**Correspondence:**
**Mallika Sen**
Phd Scholar,
Lucknow Campus Under Central-Sanskrit University,Gomti Nagar, Lucknow, Uttar Pradesh 226010

# अथर्ववेदस्यपञ्चपटलिकायाः पाठतत्त्वविमर्शः

**Mallika Sen**

**DOI:** https://doi.org/10.5281/zenodo.19943393

**सारसंक्षेपः**

वेदानामध्ययनेन सह षडङ्गानामध्ययनमपि नित्यत्वेन विहितं वर्तते शास्त्रकारैः । षडङ्गैः सह तत्तशाखायाः प्रातिशाख्यग्रन्थाः अपि अध्येतव्याः भवन्ति । प्रातिशाख्येन सह सम्बद्धशाखायाः लक्षणग्रन्थाः अपि अध्येतव्याः ।अथर्ववेदीय-परिशिष्टं सायणद्वारिलयोः अपेक्षया बहु प्राचीनः अस्ति। तेषु ४६ वा परिशिष्टं चरणव्यूहः भवति। तस्य वचनम् अस्ति ---- " **लक्षणग्रन्था भवन्ति । चतुरध्यायी, प्रातिशाख्यम्,पञ्चपटलिका , दन्त्योष्ठविधिः , बृहत्सर्वानुक्रमणी चेति।**"

लक्षणग्रन्थेषु अन्तर्निहिता एते ग्रन्थाः अथर्ववेदस्य फलफलप्रदाने अध्ययनाध्यापने च महत्त्वपूर्णसहा-यकरूपेण विवेचिताः सन्ति पूर्वाचार्यैः । एतेषु ग्रन्थमध्ये **पञ्चपटलिका** अन्यतमा भवति ।

पञ्चपटलिका अथर्ववेदस्य शौनक-संहितायाः विन्यास-विभाजनतत्त्वानां सुघटितः एकः संक्षिप्तग्रन्थः । १९२० वर्षे लाहोरे भगवद्दत्तेन सम्पादितः एषः ग्रन्थः । एषः ग्रन्थः पञ्च पटलैः घटितः, नवदश (19) नवदश खण्डे विभक्तः । विदितमेव यत्, अथर्ववेदसंहिता काण्डम्, प्रपाठकः, ऋक्, पर्यायः, अवसाने विभक्तम् । पञ्चपटलिका एकस्मिन् सुक्ते ऋक् संख्या, एकस्मिन् पर्याये अवसानं संख्या, एकस्मिन् अनुवाके सूक्तानां संख्या, एकस्मिन् काण्डे अनुवाकस्य संख्या सम्वन्धिततथ्येन सज्जितमस्ति ।

पञ्चपटलिका तित्रिषु भागेषु विभक्तमस्ति । ते यथाक्रमेण **काण्डेषु** घटितः – 2-7, 8-10, 11-18 इति भवन्ति । एतत् विभाजनं यथायथं युक्तियुक्तमिति वक्तुं शक्यते । पञ्चपटलिकायाः प्रथमाकृत्याम् अनुवाकानुसारेण, द्वितीय-तृतीयाकृत्यां सूक्तानुसारेण सूक्तस्य गणना कृता । तदुक्तं - **'सूक्तश्च गणना प्रवर्तते । इति ।**

डब्लू. डि. हुट्निं अथर्ववेदसंहितायाः अपि तिसृषु आकृतिषु विभाजनं करोति, सः एतद्विभाजनं 'ग्राण्ड डिविशन' (Grand Divisions) नाम्ना अभिधीयते । परन्तु आकृतयः (units) पञ्चपटलिकया सह सम्पूर्णरूपेण न मिलन्ति ।

अस्मिन् संख्यान्तर्गतग्रन्थे अष्टौ भिन्नाः द्वे पुस्तके )'**अ**','**ब**'( स्तः। प्रथमपटले कतिपयानि प्रारम्भिकानि शब्दाः पुनरुत्पादनं भवन्ति अन्ये च केचनः शब्दाः लोप्यन्ते तत् **उक्तानुक्तं** कथ्यते । द्वितीयपटले अथर्वसंहितायां छन्दम्,काण्डः, सूक्तादि स्थितिम् उच्यते । यजुषां ऋक्यपर्यायिकं सूक्तवर्णकं च त्रिविधानां अवसानानां व्याख्यानम् । तृतीयपटले ११ खण्डात् एकावसानः, त्रयः अवसानाः, चत्वारः अवसानाः, पञ्चावसानाः च ऋचां प्रतीकाः समाविष्टाः सन्ति । चतुर्थपटले सप्तकाण्डस्य प्रथमैकैकस्य अनुवाके प्रत्येकस्मिन् ऋक्संख्याः दत्तम् ततः अवशिष्टकाण्डानां प्रत्येकस्मिन् सूक्ते ऋक्संख्याः दत्तम् । पञ्चमपटले एतेषां काण्डानां पर्यायेषु अवसनासंख्यां ददाति , प्रति पर्यायसूक्तं प्रतीकेन निर्दिश्य भवेत् । अस्मिन् पूर्वपटले ८, ९, १२, १३, १५, १६ च काण्डस्य केषुचित् सूक्तेषु पर्याय इति उक्तम् । पञ्चमपटले उक्तम् --- **विराड्वायां चतुष्कस्तु षट् पर्यायस्तु निश्चिताः** । पञ्चपटलिका अथर्ववेदस्य महत्त्वपूर्णेषु लक्षनग्रन्थेषु अन्यतमा । अयं पञ्चपटलिका अथर्ववेदसंहितायां अनुलिपिकरणाय नियमाः व्यावहारिकोद्देश्येन च रचितम् अस्ति ।

**प्रस्तावना**

वेदस्य प्रभावः जगति मानवस्य जीवने प्रतिक्षेत्रे वर्तते । यथार्थरूपेण वक्तुं शक्यते वेदशब्दराशिः परं ब्रह्मरूपेण मन्यन्ते शास्त्रकाराः इति । स च वेदशब्दराशिः पुरा भगवता व्यासेन ऋग्य-जुस्सामाथर्वरूपेण चतुर्धा विभक्तः सन्विराजते । वेदानामध्ययनेन सह षडङ्गानामध्ययनमपि नित्यत्वेन विहितं वर्तते शास्त्रकारैः । षडङ्गेषु शिक्षा, कल्पो, व्याकरणम्, निरुक्तम्, छन्दःशास्त्रम्, ज्योति-षमित्येतेषामध्ययनं सहैव क्रियते स्म । षडङ्गैः सह तत्तशाखायाः प्रातिशाख्यग्रन्थाः अपि अध्येतव्याः भवन्ति । प्रातिशाख्येन सह सम्बद्धशाखायाः लक्षणग्रन्थाः अपि अध्येतव्याः । यतो हि लक्षणग्रन्थं विना शाखागतभाषावैशिष्ट्यं, संहितागतशब्दपदवाक्यवैचित्र्यं, शा-खायां व्याकरणनियामाः, पदनियमाः, सन्धिनियमाः, शाखायाः वि-भाजनतत्त्वानीत्येतेषां ज्ञानं सुदुष्करं भवति ।

अथर्ववेदीय-परिशिष्टं सायणद्वारिलयोः अपेक्षया बहु प्राचीनः अस्ति। तेषु ४६ वा परिशिष्टं चरणव्यूहः भवति। तस्य वचनम् अस्ति ---- **" लक्षणग्रन्था भवन्ति । चतुरध्यायी, प्रातिशाख्यम्,पञ्चपटलि-का, दन्त्योष्ठविधिः , बृहत्सर्वानुक्रमणी चेति।"**

लक्षणग्रन्थेषु अन्तर्निहिता एते ग्रन्थाः अथर्ववेदस्य फलफलप्रदाने अध्ययनाध्यापने च महत्त्वपूर्णसहायकरूपेण विवेचिताः सन्ति पूर्वा-चार्यैः । एतेषु ग्रन्थमध्ये **पञ्चपटलिका** अन्यतमा भवति।

**<u>अथर्ववेदीय पञ्चपटलिकायाः भूमिका ---</u>**

**पञ्चपटलिका** एकः संक्षिप्तग्रन्थः भवति । आधुनिककाले अस्य विषयादि सम्बन्धे सर्वप्रथमं सुविस्तृतोल्लेखः पण्डितशङ्करपाण्डुर-ङ्गस्य अस्ति । स सायणभाष्येण सह अथर्ववेदसम्पादने इत्यस्मात् पर्याप्तं सहायतां प्राप्तवान् । तदनन्तरं व्हिटनः स्वोल्लेखिताथर्ववेदस्य भूमिकायां अस्य उदाहरणं ददाति । १९२० वर्षे लाहोरे भगवद्दत्तेन सम्पादितः एषः ग्रन्थः ।

**<u>पाण्डुलिपिः अथवा प्रकाशितं प्राप्त-सामग्री ---</u>**

अस्मिन् संख्यान्तर्गतग्रन्थे अष्टौ भिन्नाः द्वे पुस्तके **('अ','ब')** स्तः। तेषु पञ्चपटलिका चतुर्थस्थानं प्राप्नोति। **( अ)** एतत् ग्रन्थं भण्डारकरा-नुसन्धानसमित्याः अस्ति । तेषां १६१६ वर्षस्य २१६१ सुचीप-त्रानुसारं तस्य संख्या ४०० सन्ति । एतत् ग्रन्थं ४८ पत्रात् आरम्भः ५६ पत्रेण समाप्तं भवति। **(ब)** पूर्वोक्त-सूचीपत्रे तस्य संख्या ३६६ सन्ति ।

**<u>पञ्चपटलिकायाः कालः ---</u>**

सायणः अथर्ववेदभाष्यस्य (३।१०।०७ ) अन्ते १४०७-४४ वर्षे उक्तवान् ---

**" पूर्णा दर्वीति पृथग्ग्रहणात् ग्रहणम् आ ग्रहणात् (कौ.८।२१) इति न्यायात् विनियोगविषये आ मा पृष्टे च इत्येकावसाना ऋक् । पञ्चपटलिकायां (३।११) तु त्र्यवसाना एकैव ऋग् इत्युक्तम् । "**

अथर्ववेदीय-परिशिष्टं सायणः दारिलः इत्यस्मात् अतीव प्राक् भवति। चरणव्यूहग्रन्थस्य पूर्वोत्धृतवाक्येन समर्थितम् अथर्ववेदीय सर्वानुक्रमणी पूर्वोक्तत्रयाणामपि पाठात् (**प्रातिशाख्यम्,पञ्चपटलिका, दन्त्योष्ठविधिः)** अतीव पुरा अस्ति । तस्मिन् द्वितीये स्थले पञ्चपटलिका अस्ति । पञ्चपटलिकायाः बहवः श्लोकेषु 'इति' पदं प्रयो-गित्वा वा तद्विना लिख्यन्ते ।

अतः पञ्चपटलिकायाः कालः अत्यन्तं प्राचीनः अस्ति । इदं कालविषये अन्यत् उदाहरणमपि लक्ष्यते, पञ्चपटलिकायाः प्रथमश्लोके परिबभ्रवस्य नाम आयाति ----

**"उक्तानुक्तस्य यं न्यायं प्रोवाच परिबभ्रवः ।"**

**पञ्चपटलिकायाः पञ्चपटलानां विषयः विवरणम् –**

पञ्चपटलिका अथर्ववेदस्य शौनक-संहितायाः विन्यास-विभाजन-तत्त्वानां सुघटितः एकः संक्षिप्तग्रन्थः । एषः ग्रन्थः पञ्च पटलैः घटितः, नवदश (19) नवदश खण्डे विभक्तः । विदितमेव यत्, अथर्ववेद-संहिता काण्डम्, प्रपाठकः, ऋक्, पर्यायः, अवसाने विभक्तम् । पञ्चपटलिका एकस्मिन् सुक्ते ऋक् संख्या, एकस्मिन् पर्याये अवसानं संख्या, एकस्मिन् अनुवाके सूक्तानां संख्या, एकस्मिन् काण्डे अनुवाकस्य संख्या सम्वन्धिततथ्येन सज्जितमस्ति ।

पञ्चपटलिका तित्रिषु भागेषु विभक्तमस्ति । ते यथाक्रमेण काण्डेषु घटितः – २-७, ८-१०, ११-१८ इति भवन्ति । एतत् विभाजनं यथायथं युक्तियुक्तमिति वक्तुं शक्यते । पञ्चपटलिकायाः प्रथमाकृ-त्याम् अनुवाकानुसारेण, द्वितीय-तृतीयाकृत्यां सूक्तानुसारेण सूक्तस्य गणना कृता । तदुक्तं - **'सूक्तश्च गणना प्रवर्तते । इति ।**

डब्लू. डि. हुट्नि अथर्ववेदसंहितायाः अपि तिसृषु आकृतिषु विभाजनं करोति, सः एतद्विभाजनं 'ग्राण्ड डिविशन' (Grand Divisions) नाम्ना अभिधीयते । परन्तु आकृतयः (units) पञ्चपट-लिकया सह सम्पूर्णरूपेण न मिलन्ति।

**<u>प्रथमः पटलः ---</u>**

प्रथमपटले कतिपयानि प्रारम्भिकानि शब्दाः पुनरुत्पादनं भवन्ति अन्ये च केचनः शब्दाः लोप्यन्ते तत् **उक्तानुक्तं** कथ्यते । इदम् उक्तानुक्तविधिः यस्मिन् संहितायां प्रयुक्तं भवति सा **आचार्यसंहिता (5/17)** , यं विनियोगार्थम् भवति सः **आर्षीसंहिता** उच्यते ।

**कौशिकसूत्रे(8/11,12) --- "आर्षीसंहितायाः कर्मसंयोगात् आचार्य-संहिताभ्यासार्थः।"**

उक्तानुक्तस्य प्रादुर्भावे प्रतीकात्मकपदं प्रकरणस्य अन्त्ये, अन्यत्र तस्य आद्यन्तपदं कथितम् अस्ति । प्रथमपटले------

**आदिष्टं१ तेषु वा यत्स्यात्तदुक्ता२नुक्तमुच्यते।**
**तदुत्पत्तौ तु संशब्दमंत्ये प्रकरणस्य च।**
**अन्यत्रैकं पदं वाच्यं तस्यारंभविरामयोः ।**
**अंत्य३ मारंभणं विद्यादाद्यं विरमणं भवेत् ।**

कां.2 सू.16 ए **'अग्ने यत् ते'** पञ्चमन्त्रादौ आगच्छति । तत्र प्रथमा-न्तिममन्त्रौ त्यक्ता 2,3,4 मन्त्रेषु **"ते"** पदं योजयित्वा **'अग्ने यत्'** त्यक्तव्यं अर्थात् मन्त्रे 2 **'ते हरेः'** इत्यादयः लिखितव्याः । तथा चकां.

सूत्रस्य (8/10) पर्याये 2 पूर्वे 8/10,1 **'सोदक्रामत्'** इति पदस्य न लिखित्वा तस्य स्थाने **'सान्तरिक्षे'** इति मन्त्रपाठस्य लेखनं करणीयम्। इदम् अत्र उदाहरणम् । पुनः यतः आद्यन्तपदस्यनिवृत्तिं क्रियते , अत एव तत्र तेषां सन्निहितपदं आह्वयितव्यम् । **'ते चक्रुः'** सूक्तसप्तम्यां **5/31/1** तथा **'दिशोघायुः' 5/10/1** अत्र उदाहरणम् । प्रथमे पटले ---

**"ते हरः४ , सांतरिक्षे५, च विद्यादत्र निदर्शनम् ।**
**यतस्तूर्द्ध्वं निवृत्तिः६स्यादाद्यस्यांत्यस्य वा पुनः ।**
**तेनैव तत्र वक्तव्ये तयोश्चानंतरे पदे ।**
**ते चक्रुः७ ,सूक्तसप्तम्यां दिशो घायु८र्निदर्शनम् ।।"**

**'आकार'** यत्र प्रथमं भवति ,तत्रापि शब्दद्वयं वदतु । 'सा पितृन' प्रभृति पर्यायानां 'एहीति' = आ + इति 8 । 10 । 4 , 5 अत्र उदाहरणम् । अवसानैकदेशः यः अन्ततां प्राप्तुं शक्यते , तत्र च क्रमपाठसमाप्त्यर्थं पदद्वयं उक्तम् । 'यो 3जम् = यः + अजम् ' 6 । 5 । 22 'स्कम्भं तम् 10 । 7 । 4 एतत् उदाहरणं ज्ञातव्यम् । अर्थात् एतौ पदौ स्थापयित्वा अन्तिम् पदं निवृत्तिं कृतम् । यत् अवसानं भूत्वा पुनः अवयवः भवेत् ,अर्थात् अवसानस्य भागं भवेत् , तासामपि अन्त्यान् अवसानानां वत् उत्सृजेत् ।

**<u>द्वितीयः पटलः</u> ---**

अथर्वसंहितायां छन्दम्,काण्डः, सूक्तादि स्थितिम् उच्यते । यजुषां ऋक्यपर्यायिकं सूक्तवर्णकं च त्रिविधानां अवसानानां व्याख्यानम् । षट् अनुवाकान् त्यक्त्वा, प्रथमे चतुर्षु काण्डे पञ्चसूक्तस्य अनुवाकं सन्ति । अर्थात् काण्डम् १ अ. १ , ५ , ६ । कां २ अ. ३ , ४ । कां ३ अ. ६ ।

एवं प्रथमकाण्डस्य नियमः अस्ति यत् तेषां सूक्तानां प्रति चतुरः ऋचां सन्ति—

**"पूर्वकाण्डस्य चतुर्षु पञ्चञ्चतिरित्येवमुत्तरोतरकाण्डेषु षष्ठम्।**
**यावदेकेकाधिक तावत् सूक्तेषु ऋचिति विनानीयात् ।।"**

तृचोः अर्थात् त्रयः ऋचाः युक्ताः षट्काण्डे अनुवाकं प्रति दश (१०) सूक्ताः सन्ति , परन्तु पञ्च अपवादात्मकाः अनुवाकाः सन्ति -- ३ ,७, ११ ,१२ ,१३ । एतेषु प्रथमचतुर्षु ११ सूक्ताः अन्तिमे १८

१.अ,आदिष्टं । ४. २।१९।२ । ७. ५।३१।१। १.अ,ब, स्यातदुक्त । ५. ८।१०।२,१ । ८. ५।१०।१। २.अ,ब,अन्त्य। ६. अ, ब, निवृत्ति।

सूक्ताः च सन्ति । एकस्य ऋचस्य सप्तमकाण्डे १ ,२ ऋचौ सूक्तम् अस्ति । क्षुद्रो अर्थात् ८ - ११ काण्डपर्यन्तं सूक्तद्वययुक्ताः अनुवाकम् अस्ति । १७ अर्थात् अन्तिमकाण्डे सूक्तस्यैकानुवाकस्य काण्डम् अस्ति । **काण्डसूक्ताः शेषे पर्यायिकवर्जम् ।**

**<u>तृतीयः पटलः</u> ---**

सामान्यतः सूक्ते ऋक् अवसानद्वयं कल्प्यते । । परन्तु अस्य नियमस्य केचन अपवादाः सन्ति । केषुचित् ऋक्षु एकमेव अवसानो भवति , केषुचित् त्रयः, चत्वारः वा पञ्च वा अवसानाः सन्ति । तृतीयपटले तादृशान् अपवादान् यथाक्रमं ददाति,सुक्तान् प्रतीकैः निर्दिश्यन्ते । ११ खण्डात् एकावसानः, त्रयः अवसानाः, चत्वारः अवसानाः, पञ्चावसानाः च ऋचां प्रतीकाः समाविष्टाः सन्ति ।

बर्लिन-संस्करणे बहवः ऋचां द्वौ अवसानौ स्तः । मुम्बई-संस्करणे त्रयः अवसानाः सन्ति ।

**<u>चतुर्थःपटलः</u> ---**

अस्मिन् पटले सप्तकाण्डस्य प्रथमैकैकस्य अनुवाके प्रत्येकस्मिन् ऋक्संख्याः दत्तम् ततः अवशिष्टकाण्डानां प्रत्येकस्मिन् सूक्ते ऋक्संख्याः दत्तम् ।पर्यायसूक्तेषु पर्यायसंख्या अपि दीयते। अयं ऋक्गणनायां काले किञ्चित् वृत्तसङ्ख्याः आदर्शरूपेण गृह्णाति तथा च अनुवाके वा सूक्ते यथावत् अतिरिक्तं ( न्यूनाधिकं वा ) ऋक्सङ्ख्याः ददाति । एवं २० संख्या काण्डानां १, २, ७ , ८ , ९ , ११ च कृते आदर्शरूपेण गृह्यते; ३० संख्या काण्डानां ३, ४ , ६ , १० इत्येतयोः कृते मानकरूपेण गृह्यते , ६० संख्या काण्डानां ५ ,१२ च कृते आदर्शरूपेण गृह्यते ।

**<u>पञ्चम- पटलः</u> ---**

अस्मिन् पूर्वपटले ८, ९, १२, १३, १५, १६ च काण्डस्य केषुचित् सूक्तेषु पर्याय इति उक्तम् । पञ्चमपटले एतेषां काण्डानां पर्यायेषु अवसनासंख्यां ददाति , प्रति पर्यायसूक्तं प्रतीकेन निर्दिश्य भवेत्।

अथर्ववेदस्य अष्टमकाण्डे अवसानस्य पर्यायसंख्या ---- १३ + १० + ८ + १६ + १६ + ४ = ६७

पञ्चमपटले उक्तम् --- **विराड्वायां चतुष्कस्तु षट् पर्यायस्तु निश्चिताः ।**

व्रात्यः अर्थात् १५ काण्डस्य पर्यायस्य अवसानसंख्या ---

प्रथमानुवाके ---- ८ + २५ + ११ + १८ + १६ + २६ + ५ = ११२।

द्वितीयानुवाके ---- ३ + ३ + ११ + ११ + ११ + १४ + २४ + ९ + ७ + १० + ५ = १०८ ।

कुलसंख्या ---- ११२ + १०८ = २२० ।

**<u>निष्कर्षः</u> ----**

पञ्चपटलिका अथर्ववेदस्य महत्त्वपूर्णेषु लक्षनग्रन्थेषु अन्यतमा । अयं पञ्चपटलिका अथर्ववेदसंहितायां अनुलिपिकरणाय नियमाः व्यावहारिकोद्देश्येन च रचितम् अस्ति । शास्त्रविदः तस्य नियमानाम् अनुसरणं कृत्वा यत् पाठस्य कुत्र विभाजनं कर्तव्यम्, काण्ड, अनुवाक, सूक्त इत्यादीनां गणनां कथं करणीयम् इति ज्ञातुं शक्नुवन्तः। यथा एकस्मिन् सूक्ते ऋक्, अवसानसङ्ख्या, एकस्मिन् अनुवाके सूक्तसङ्ख्या, एकस्मिन् काण्डे अनुवाकसंख्या च निर्दिशति । पञ्चपटलिका एतेषु सर्वविषयेषु विधीन् अतीव यत्नसहकारेण निरूपयति एवं पञ्चपटलिका अथर्ववेदसंहितायां पाठसंरक्षणस्य उपयोगी उद्देश्येन परिवेशयति ।

**अन्त्यटिप्पण्या सह सन्दर्भग्रन्थानांसूची**

१. **मोदकः, वालचन्द्रः रघुनाथः।** The Anciallry Literature Atharvaveda, Rasthtriya Veda Vidya Prakashan, New Delhi, निउ-दिल्ली: राष्ट्रीय-वेद-विद्या प्रकाशनम्, 1993

२. **भगवद्दत्तः, बी.ए.** । अर्थर्ववेदीय-पञ्चपटलिका,The Research Deparment, DAV College Publication, 1920

३. **शर्मा, ए.एल.एन्** ।अर्थर्ववेदीय-पञ्चपटलिक, मेहरचन्द्र लक्षणदास पाबलिकेशन्, नई दिल्ली, 2014

४. **शास्त्रीः, राममोपालः** । अर्थर्ववेदीय-बृहत्सर्वानुक्रमणी, लाहोरः : दयानन्द महाविद्यालय प्रकाशनम्, 1921

५. **Whitney W.D.**Hymns of Atharvaveda, Sacred Book of the Ease Series, प्रकाशनम्, 1897 ।

६. **Whitney W.D.** Oriental and Linguistics Studies, 1875

७. **Lahiri.** The Atharvaveda, Howra, 1919

८. **के, त्रिवेदी**।The Atharvaveda, Allahabad, 1912

९. **वोलिंग, जार्जः मेलवीलः**। नेजलीन, जुलियसः फांनः। अथर्ववेद-परिशिष्ट, दिल्ली: चैखम्बा औरियन्टालिया प्रकाशनम्, 2008

१०. **एस्.पि,पण्डितः**। The Atharvaveda, Bombay, 1895

११. **एस्.डि,सातवलेकर** । अथर्ववेद-संहिता । औंधा : 1939

१२. **सेवकलाल** । अथर्ववेद-संहिता, Bombay, 1884

१३. **एलन् , डब्लु. एस्.**। Phonetics in Ancient India, London, 1953

१४. **भगवद्दत्तः**। A History of Vedic Literature (Hindi)

१५. **Keith, A.B.** The Religion and Philosophy of the Veda and Upanishad, London, 1925

१७. **Law. V.V.** Trible in Ancient India, Pune, 1943

१८. **Mac Donald A.A.** Vedic Mythology, 1897

१९. **मिश्र, वि.सि.**। बृहत्संहिता (हिन्दी), बोम्बे, 1897

२०. **Mac Donald A.A.** Vedic Grammer, 1910

२१. **च्याटार्ज्जी ,के.सि.**। On the Text of the Atharvaveda, Part – 4, Oct. 1954

२२. **Mac Donald A.A.** Hyms Vedic, Encyclopedia of Riligion and Ethics 7

२३. **भगवद्दत्तः**। अथर्ववेदीय माण्डुकी शिक्षा, लाहोर, 1921

२४. **भगवद्दत्तः**। अथर्वण ज्योतिष्, लाहोर, 1923

२५. **Bloomefield M.** Hymns of Atharvaveda, 1897

२६.**Griffith R.T.H** Hymns of Atharvaveda (इंराजी), बनारस, 1895-96

२७. **ब्लुमफिल्ड , एम.** । द्य कौशिक सूत्र (जार्नल् अफ् द्य आमेरिकान् ओरियेन्टाल सोसाइटि १४ ) । १८९० ।

२८. **गारवे , आर्**। The Vaitana Sutra, London1874

२९. **गारवे , आर्**।The Paippalada Atharvaveda, 1901

३१. **मित्र, आर्, विद्याभूषण, एइच्** ।The Gopatha Brahmana, कोलकाता, 1872

३२. **शास्त्री, नारायण टि.एम.**। सप्तलक्षण अफ् श्रीवत्साणक, कुम्बकोणम्, 1918

३३. **रघुवीरः** । Atharvaveda of Paippaladas, Lahore, 1936-41

३४. **सिनह , इउ. एन्.**। अथर्ववेदीय कौशिक गृह्य सूत्र, विहार, 1942

३५. **सूर्यकान्तः** । The Atharvaveda Pratishakhya, Lahore, 1939

३६. **वरदाचार्य, भि.**। संस्कृत साहित्य का इतिहास, रामनारायणलाल वेणीप्रसाद प्रकाशक, 1962

**(Secondary Sources)**

३७. **वन्द्योपाध्यायः, शान्तिः**। वैदिक साहित्येर रूपरेखा। कोलकाता : संस्कृत पुस्तक भाण्डार प्रकाशनम्, १९९३ (प्रथमः प्रकाशः), (द्वितीयः प्रकाशः) २००२, २००३ (तृतीयसंस्करणम्)।

३८. **वसु, योगीराजः**। वेदेर परिचय। कोलकाता : फार्मा के. एल. एम. प्राइभेटलिमिटेड प्रकाशनम्, २०१५ (एकादशमुद्रण)

३९. **वन्द्योपाध्यायः, अशोककुमारः**। पाणिनीयशिक्षा। कोलकाता सदेश प्रकाशनम्, २०१६।

४०. **सिंहः, मदमरः** । अमरकोशः । मुम्बाइ: श्रीवेङ्कटेश्वर प्रकाशनम्, १८६५ ।

**अन्तर्जालसूची**

- www.googlebooks.com
- www.sanskritilibrary.com
- www.shodhganga.com
- www.archive.com
- www.epustkalaya.in